॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

19

पाणिनि-विरचिता

# अष्टाध्यायी

(पदच्छेद-वृत्ति-वार्तिक-टिप्पणी-सहिता)

परिष्कर्ता

म०म० पण्डितराज डॉ० श्रीगोपालशास्त्री 'दर्शनकेशरी'

(काशी-पण्डित-सभाध्यक्षः, राष्ट्रपतिसम्मानितश्च)

सम्पादकः

प्रो० गोपालदत्तपाण्डेयः (एम०ए०, व्याकरणाचार्यः)

(अवकाशप्राप्त उप-शिक्षानिदेशकः, उत्तरप्रदेशस्य)

चौखम्बा सुरभारती प्रकाशन

वाराणसी

सवृत्तिः

# अष्टाध्यायीसूत्रपाठः

ॐ विश्वानि देव सवितदुरितानि परासुव।
यद् भद्रं तन्न आसुव॥ (यजुः ३०.३; ऋ० ५.८२.५)

## * अथ शब्दानुशासनम्[१] *

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम्॥
एको धातुः प्रासृतेर्वार्द्ध-गौणात् तिङ्-कृत्-सुब्योगादानन्तत्वमेति।
ब्रह्माद्वैतं शब्दशास्त्रस्य बोध्यं धातुब्रह्मप्रासृतं तिङ्सुबन्तम्॥

### अक्षर-समाम्नायः

[२]अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्।

इति प्रत्याहारसूत्राणि माहेश्वराणि

प्रत्याहाराक्षराणि—अइउ, ऋलृ, एओ, ऐऔ, हयवर, ल, ञमङणन, झभघढध, जबगडद, खफछठथ चटतकप, शषस, ह। अत्र 'अहम्' इति प्रत्याहारोऽपि गुरुभ्यो ज्ञेयः। अण् प्रत्याहारः पूर्वेणेति सर्वत्र। अणुदित्० (१.१.६९) सूत्रे परेणैव। इण् प्रत्याहारस्तु परेणैवेति विवेकः।

एकस्माण्णङटञवा द्वाभ्यां वस्त्रिभ्य एव कणमाः स्युः।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः॥
ञमन्ताड्डः रखौ चेति ञयेकोऽपर ऊहितः।
प्रत्याहारा भवन्त्येवं चत्वारिंशच्च पञ्च[३] च॥

---

१. पतञ्जलि-मङ्गलसूत्रम्, नेदं पाणिनि-सूत्रम्। व्यर्थहठ आर्यसमाजिनां पाणिनिसूत्रग्रहणे।

२. नृत्तावसाने नटराज-राजो ननाद ढक्कां नव पञ्च (१४) वारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिव-सूत्रजालम्। (नन्दिकेश्वरीयम्)

३. 'र'प्रत्याहारवत् 'थ'स्य अकारम् इतं मत्वा 'ख'प्रत्याहारोऽपि द्वितीयमहाप्राणाक्षरसंग्रहाय तर्कितः। 'ञय्' तु वर्गाक्षरसंग्रहायेति प्रत्याहारद्वयवृद्धिः।

# अथ प्रथमोऽध्यायः

## अथ पाणिनि-सूत्राणि

### प्रथमः पादः

१. **वृद्धिरादैच्** ३

२. अदेङ्गुणः ३

३. **इको गुण-वृद्धी** ६

४. न धातुलोप आर्धधातुके ६

५. क्ङिति च

६. दीधीवेवीटाम्

७. हलोऽनन्तराः संयोगः

८. मुखनासिकावचनोऽनुनासिकः

९. तुल्यास्यप्रयत्नं **सवर्णम्** १०

(वा०)ऋ-ऌ-वर्णयोर्मिथः सावर्ण्यं वाच्यम्

१०. नाज्झलौ

११. **ईदूदेद्** द्विवचनं **प्रगृह्यम्** १२,१९

१२. अदसो मात्

१३. शे

१४. **निपात** एकाजनाङ् १५

१५. **ओत्** १६

१६. सम्बुद्धौ **शाकल्यस्येता-वनार्षे** १८

१७. **उञः** १८

१८. ऊँ

---

१. वृद्धिशब्दो विधेयोऽपि मङ्गलार्थमादौ पठितः। अदेङ् गुणः १.१.२ पूर्वोऽपि पश्चाद् गतो मङ्गलधियैव। वृद्धिरादैच् १.१.१ इति प्राथम्यगमनं मङ्गलकारणादित्युक्तं भूमिकायाम्। अष्टके बहूनि सूत्राणि प्राचां विदुषामपि सन्तीति विमर्शः। औङ आपः ७.१.१८, आङि चापः ७.३.१०५ इत्यादि।

४. धात्वंशलोपनिमित्त इत्यर्थः।

१०. आकारेण सहितोऽच् इति आच्, आच् च हल् च आज्झलौ।

१४. ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्।।

१८. यथोत्तरं मुनीनां प्रामाण्यम् इति पतञ्जलिकृतयोगविभाग एव ग्राह्यः। व्यर्थहठ आर्यसमाजिनां पाणिनिप्रत्तसंख्याग्रहणे। सूत्रसंख्याह्रासः। उक्तं तथ्यं केनापि—
दृष्ट्वा शास्त्रगणान् प्रयोगसुलभान् प्रायेण दाक्षी-सुतः,
प्रोचे तस्य तु विस्मृतानि कतिचित् कात्यायनः प्रोक्तवान्।
तद्-भ्रष्टान्यवदत् पतञ्जलिमुनिस्तेनापि यद् विस्मृतम्,
शास्त्राल्लोकत एव तेऽपि विदधुश्चन्द्रादिभोजादयः।।१।।



१९. ईदूतौ च सप्तम्यर्थे

२०. दाधाघ्वदाप् (१)

२१. आद्यन्तवदेकस्मिन्

२२. तरप्तमपौ घः

२३. बहुगणवतुडति **संख्या** २५

२४. ष्णान्ता **षट्** २५

२५. डति च

२६. क्तक्तवतू निष्ठा

२७. **सर्वादीनि सर्वनामानि** ३२,३६

२८. विभाषा दिक्समासे **बहुव्रीहौ** २९

२९. **न** बहुव्रीहौ ३२

३०. तृतीया**समासे** ३२

३१. **द्वन्द्वे** च ३२

३२. **विभाषा जसि** ३६

३३. प्रथम-चरम-तयाल्पार्द्ध-कतिप-यनेमाश्च

३४. पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्

३५. स्वमज्ञातिधनाख्यानाम्

३६. अन्तरं बहिर्योगोपसंव्यानयोः

३७. स्वरादिनिपात**मव्ययम्** ४१

३८. तद्धितश्चाऽसर्वविभक्तिः

३९. कृन्मेजन्तः

४०. क्त्वातोसुन्कसुनः (२)

४१. अव्ययीभावश्च

४२. शि **सर्वनामस्थानम्** ४३

४३. सुडनपुंसकस्य

४४. न वेति विभाषा

४५. इग्यणः सम्प्रसारणम्

४६. आद्यन्तौ टकितौ

४७. मिदचोऽन्त्यात् परः

४८. एच इग्घ्रस्वा**देशे** ५५

४९. **षष्ठी स्थाने**योगा ५५

५०. स्थानेऽन्तरतमः

५१. उरण् रपरः

५२. **अलोऽन्त्यस्य** ५४,५३

---

२४. 'षट्'—षष् शब्दस्य बहुवचनरूपं न तु एकवचनम्। 'षड्भ्यो लुक् ७.१.२२' इति सूत्रप्रमाणात्। अत्रापि आर्यसमाजिनां हठः। नन्तषन्ताश्च मिलिताः षट् (६) एव शब्दाः सन्ति। ते च—पञ्चन् षष् सप्तन् अष्टन् नवन् दशन् इति। महती सार्थकता संज्ञानाम्। गुणनं वर्द्धनं वृद्धिरितिवत्।

३०. समासग्रहणेऽनुवर्तमाने पुनः समासग्रहणात्तृतीयासमासार्थवाक्येऽपि निषेधः।

३७. सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।

३८. यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्त इत्यर्थः।

४५. विस्तारकरणं सम्प्रसारणम्—अर्धमात्रिको (य्) यकारो हि एकमात्रिक इकारो जायते।

४७. अच इति निर्धारणे षष्ठी अचां मध्ये इत्यर्थे।

४९. श्लेषेण अयोगा अव्यक्तसम्बन्धा षष्ठी स्थाने ज्ञेया। अथवा इह शास्त्रे अनियतसम्बन्धा षष्ठी स्थाने योगो यस्या इति समासे पूर्वपदविभक्तेरलुकि स्थानेयोगेत्येकम्पदम्।